# Shri Shitala Kavacham

# શ્રીશીતલાકવચમ્

## Document Information

Text title : shItalAkavacham

File name : shItalAkavacham.itx

Category : devii, kavacha, otherforms, devI

Location : doc_devii

Transliterated by : NA

Proofread by : Meena Rentachintala

Description/comments : Shaktiyamala

Latest update : May 29, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

Shri Shitala Kavacham

# શ્રીશીતલાકવચમ્

પાર્વત્યુવાચ -
ભગવન્ સર્વધર્મજ્ઞ સર્વશાસ્ત્રવિશારદ ।
શીતલાકવચં બ્રૂહિ સર્વભૂતોપકારકમ્ ॥ ૧॥

વદ શીઘ્રં મહાદેવ ! કૃપાં કુરુ મમોપરિ ।
ઇતિ દેવ્યાઃ વચો શ્રુત્વા ક્ષણં ધ્યાત્વા મહેશ્વરઃ ॥ ૨॥

ઉવાચ વચનં પ્રીત્યા તત્શ‍ૃણુષ્વ મમ પ્રિયે ।
શીતલાકવચં દિવ્યં શ‍ૃણુ મત્પ્રાણવલ્લભે ॥ ૩॥

ઈશ્વર ઉવાચ -
શીતલાસારસર્વસ્વં કવચં મન્ત્રગર્ભિતમ્ ।
કવચં વિના જપેત્ યો વૈ નૈવ સિદ્ધ્યન્તિ કલૌ ॥ ૪॥

ધારણાદસ્ય મન્ત્રસ્ય સર્વરક્ષાકરનૃણામ્ ।
વિનિયોગઃ -
કવચસ્યાસ્ય દેવેશિ ! ઋષિર્પોક્તો મહેશ્વરઃ ।
છન્દોઽનુષ્ટુપ્ કથિતં ચ દેવતા શીતલા સ્મૃતા ।
લક્ષ્મીબીજં રમા શક્તિઃ તારં કીલકમીરિતમ્ ॥ ૫॥

લૂતાવિસ્ફોટકાદીનિ શાન્ત્યર્થે પરિકીર્તિતઃ ।
વિનિયોગઃ પ્રકુર્વીત પઠેદેકાગ્રમાનસઃ ॥ ૬॥

વિનિયોગઃ -
ૐ અસ્ય શીતલાકવચસ્ય શ્રીમહેશ્વર ઋષિઃ અનુષ્ટુપ્છન્દઃ,
શ્રીશીતલા ભગવતી દેવતા, શ્રીં બીજં, હ્રીં શક્તિઃ,
ૐ કીલકં લૂતાવિસ્ફોટકાદિશાન્ત્યર્થે પાઠે વિનિયોગઃ ॥

ઋષ્યાદિન્યાસઃ -
શ્રીમહેશ્વરઋષયે નમઃ શિરસિ

અનુષ્ટુપ્ છન્દસે નમઃ મુખે,
શ્રીશીતલા ભગવતી દેવતાયૈ નમઃ હૃદિ
શ્રી બીજાય નમઃ ગુહ્યે
હ્રીં શક્તયે નમઃ નાભૌ,
ॐ કીલકાય નમઃ પાદયો લૂતાવિસ્ફોટકાદિશાન્ત્યર્થે
પાઠે વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

ધ્યાનં -
ઉદ્યત્સૂર્યનિભાં નવેન્દુમુકુટાં સૂર્યાગ્નિનેત્રોજ્જ્વલાં
    નાનાગન્ધવિલેપનાં મૃદુતનું દિવ્યામ્બરાલઙ્કૃતામ્ ।
દોર્ભ્યાં સન્દધતીં વરાભયયુગં વાહે સ્થિતાં રાસભે
    ભક્તાભીષ્ટફલપ્રદાં ભગવતીં શ્રીશીતલાં ત્વાં ભજે ॥

અથ કવચમૂલપાઠઃ -
ॐ શીતલા પાતુ મે પ્રાણે રુનુકી પાતુ ચાપાને ।
સમાને ઝુનુકી પાતુ ઉદાને પાતુ મન્દલા ॥ ૧॥

વ્યાને ચ સેઢલા પાતુ મનુર્મે શાઙ્કુરી તથા ।
પાતુ મામિન્દ્રિયાન્ સર્વાન્ શ્રીદુર્ગા વિન્ધ્યવાસિની ॥ ૨॥

ॐ મમ પાતુ શિરો દુર્ગા કમલા પાતુ મસ્તકમ્ ।
હ્રીં મે પાતુ ભ્રુવોર્મધ્યે ભવાની ભુવનેશ્વરી ॥

પાતુ મે મધુમતી દેવી ॐકારં ભૃકુટીદ્વયમ્ ॥ ૩॥

નાસિકાં શારદા પાતુ તમસા વર્ત્મસંયુતમ્ ।
નેત્રૌ જ્વાલામુખી પાતુ ભીષણા પાતુ શ્રુતિર્મે ॥ ૪॥

કપોલૌ કાલિકા પાતુ સુમુખી પાતુ ચોષ્ઠયોઃ ।
સન્ધ્યયોઃ ત્રિપુરા પાતુ દન્તે ચ રક્તદન્તિકા ॥ ૫॥

જિહ્વાં સરસ્વતી પાતુ તાલુકે વ વાગ્વાદિની ।
કણ્ઠે પાતુ તુ માતઙ્ગી ગ્રીવાયાં ભદ્રકાલિકા ॥ ૬॥

સ્કન્ધૌ ચ પાતુ મે છિન્ના કકુમે સ્કન્દમાતરઃ ।
બાહુયુગ્મૌ ચ મે પાતુ શ્રીદેવી બગલામુખી ॥ ૭॥

કરૌ મે ભૈરવી પાતુ પૃષ્ઠે પાતુ ધનુર્ધરી ।
વક્ષઃસ્થલે ચ મે પાતુ દુર્ગા મહિષમર્દિની ॥ ૮॥

હૃદયે લલિતા પાતુ કુક્ષૌ પાતુ મઘેશ્વરી । (મઘા ઈશ્વરી) (મહેશ્વરી)
પાર્શ્વૌ ચ ગિરિજા પાતુ ચાન્નપૂર્ણા તુ ચોદરમ્ ॥ ૯॥

નાભિં નારાયણી પાતુ કટિં મે સર્વમઙ્ગલા ।
જઙ્ઘયોર્મે સદા પાતુ દેવી કાત્યાયની પુરા ॥ ૧૦॥ (one mAtrA shift on both pAda)
બ્રહ્માણી શિશ્નં પાતુ વૃષણં પાતુ કપાલિની ।
ગુહ્યં ગુહ્યેશ્વરી પાતુ જાનુનોર્જગદીશ્વરી ॥ ૧૧॥

પાતુ ગુલ્ફૌ તુ કૌમારી પાદપૃષ્ઠં તુ વૈષ્ણવી ।
વારાહી પાતુ પાદાગ્રે ઐન્દ્રાણી સર્વમર્મસુ ॥ ૧૨॥

માર્ગે રક્ષતુ ચામુણ્ડા વને તુ વનવાસિની ।
જલે ચ વિજયા રક્ષેત્ વહ્નૌ મે ચાપરાજિતા ॥ ૧૩॥

રણે ક્ષેમકરી રક્ષેત્ સર્વત્ર સર્વમઙ્ગલા ।
ભવાની પાતુ બન્ધૂન્ મે ભાર્યા રક્ષતુ ચામ્બિકા ॥ ૧૪॥

પુત્રાન્ રક્ષતુ માહેન્દ્રી કન્યકાં પાતુ શામ્ભવી ।
ગૃહેષુ સર્વકલ્યાણી પાતુ નિત્યં મહેશ્વરી ॥ ૧૫॥

પૂર્વે કાદમ્બરી પાતુ વહ્નૌ શુક્લેશ્વરી તથા ।
દક્ષિણે કરાલિની પાતુ પ્રેતારુઢા તુ નૈરૃતે ॥ ૧૬॥

પાશહસ્તા પશ્ચિમે પાતુ વાયવ્યે મૃગવાહિની ।
પાતુ મે ચોત્તરે દેવી યક્ષિણી સિંહવાહિની ।
ઈશાને શૂલિની પાતુ ઊર્ધ્વે ચ ખગગામિની ॥ ૧૭॥

અધસ્તાત્વૈષ્ણવી પાતુ સર્વત્ર નારસિંહિકા ।
પ્રભાતે સુન્દરી પાતુ મધ્યાહ્ને જગદમ્બિકા ॥ ૧૮॥

સાયાહ્ને ચણ્ડિકા પાતુ નિશીથેઽત્ર નિશાચરી ।
નિશાન્તે ખેચરી પાતુ સર્વદા દિવ્યયોગિની ॥ ૧૯॥

વાયૌ માં પાતુ વેતાલી વાહને વજ્રધારિણી ।
સિંહા સિંહાસને પાતુ શય્યાં ચ ભગમાલિની ॥ ૨૦॥

સર્વરોગેષુ માં પાતુ કાલરાત્રિસ્વરુપિણી ।
યક્ષેભ્યો યક્ષિણી પાતુ રાક્ષસે ડાકિની તથા ॥ ૨૧॥

ભૂતપ્રેતપિશાચેભ્યો હાકિની પાતુ માં સદા ।
મન્ત્રં મન્ત્રાભિચારેષુ શાકિની પાતુ માં સદા ॥ ૨૨॥

સર્વત્ર સર્વદા પાતુ શ્રીદેવી ગિરિજાત્મજા ।
ઇત્યેતત્કથિતં ગુહ્યં શીતલાકવચમુત્તમમ્ ॥ ૨૩॥

ફલશ્રુતિઃ -
બ્રહ્મરાક્ષસવેતાલાઃ કૂષ્માણ્ડા દાનવાદયઃ ।
વિસ્ફોટકભયં નાસ્તિ પઠનાદ્ધારણાદ્યદિ ॥ ૧॥

અષ્ટસિદ્ધિપ્રદં નિત્યં ધારણાત્કવચસ્ય તુ ।
સહસ્રપઠનાત્સિદ્ધિઃ સર્વકાર્યાર્થસિદ્ધિદમ્ ॥ ૨॥

તદર્ધં વા તદર્ધં વા પઠેદેકાગ્રમાનસઃ ।
અશ્વમેધસહસ્રસ્ય ફલમાપ્નોતિ માનવઃ ॥ ૩॥

શીતલાગ્રે પઠેદ્યો વૈ દેવીભક્તૈકમાનસઃ ।
શીતલા રક્ષયેન્નિત્યં ભયં ક્વાપિ ન જાયતે ॥ ૪॥

ઘટે વા સ્થાપયેદ્દેવી દીપં પ્રજ્વાલ્ય યત્નતઃ ।
પૂજયેત્જગતાં ધાત્રી નાના ગન્ધોપહારકૈઃ ॥ ૫॥

અદીક્ષિતાય નો દદ્યાત કુચૈલાય દુરાત્મને ।
અન્યશિષ્યાય દુષ્ટાય નિન્દકાય દુરાર્થિને ॥ ૬॥

ન દદ્યાદિદં વર્મ તુ પ્રમત્તાલાપશાલિને ।
દીક્ષિતાય કુલીનાય ગુરુભક્તિરતાય ચ ॥ ૭॥

શાન્તાય કુલશાક્તાય શાન્તાય કુલકૌલિને ।
દાતવ્યં તસ્ય દેવેશિ ! કુલવાગીશ્વરો ભવેત્ ॥ ૮॥

ઇદં રહસ્યં પરમં શીતલાકવચમુત્તમમ્ ।
ગોપ્યં ગુહ્યતમં દિવ્યં ગોપનીયં સ્વયોનિવત્ ॥ ૯॥

મૂલમન્ત્રઃ - ૐ શ્રીં હ્રીં ૐ ।

॥ શ્રીઈશ્વરપાર્વતીસમ્વાદે શક્તિયામલે શીતલાકવચં સમ્પૂર્ણમ્ ॥

Proofread by Meena Rentachintala

*Shri Shitala Kavacham*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*